क्रम सं० [illegible]

प्रवेश सं० ४६०२६४

विषय: [illegible]

ग्रन्थकार

नाम [illegible]

पत्र सं०

श्लोक सं०

अक्षर सं० (पंक्तौ)

पंक्ति सं० (पृष्ठे) ११

आकार:

लिपि: [illegible]

आधार: [illegible]

वि० विवरणम्

663656

पी० एस० यू० पी०—३३ एस० पी० ई०—१६५१—२०,०००

[illegible]

Indira Gandhi National Centre for the Arts

उत्तमस्यपद्धतिः

Indira Gandhi National
Centre for the Arts

ॐ नमो गणेशाय ॥ ॥ अथ पुरुषमेधस्य पद्धतिर्लिख्यते ॥ ब्राह्मणराजन्ययोरतिष्ठाकाम
योः पुरुषसंज्ञो यज्ञो भवति । सर्वाणि भूतान्यतीत्य तिष्ठेत्स्थानमतिष्ठा । तत्र चैत्रशुक्लदशम्या
मारभ्य । पुरुषमेधेनाहं यक्ष्ये इति वरणं । अत्र त्रयोविंशतिर्दीक्षा भवंति द्वादशोपसदः
पंचसुत्या इति । एवं चत्वारिंशद्दिनैरयं सिध्यति । अत्र यूपैकादशिनी भवति एकादशयूपा
भवंतीत्यर्थः । उभयमप्यनेनैव विधीयते । एकादशिनी च यूपाः तद्वत्सवनीयाश्च । तेषा
मेकादशानां यूपानामुपशयपत्नीयूपसहितानां छेदनादि नित्यवन्नान्तः सर्वो विधिर्यूपे
कादशिनीवत् । एकादशाग्नीषोमीयाः पशवो भवंति । तेषां च प्रतियूपं मध्ये वा यूपे यथे
ष्टं नियोजनं । एक एव तेषां पशुपुरोडाशः । सुत्यासु अग्निष्टोमसंस्थं प्रथममहः । द्वितीयमु
क्थ्यसंस्थं । तृतीयमतिरात्रसंस्थं । चतुर्थमुक्थ्यसंस्थं । पंचममग्निष्टोमसंस्थमिति पंचसु
त्याहानि । तेषु प्रत्यहमेकादशिनाः पत्नीशावो भवंति एकादशिनाः सुत्यासु पशवो भवंती
ति श्रुतेः । द्वादशाहिकोऽत्र विध्यंतः । तेनांत्ययजनाम ह्रपत्नीसंयाजांजता । म्वः सुत्यामिति १

प्रेषः । माध्यंदिने वसतीयवसतीवरीणां ग्रहणं । अस्तमिते सर्वेष्वग्निषु समिदाधानमित्यादयः
सर्वे गणधर्मा भवंति । अत्रापि राज्ञः पुरुषमेधेऽश्वमेधवद्दक्षिणा पुरुषैः सहिता । दिग्विजयसम
ये प्राच्यां दिशि भूमिर्ब्राह्मणस्व वर्जितं यावद्द्रव्यं पुरुषसहितमानीतं । तत्पंचधा विभज्य प्रत्यहमे
कैकं भागं होत्रे दद्यात् । एवं दक्षिणादिगुत्पन्नं द्रव्यं पंचधा विभज्यैकैकं भागं प्रतिसुत्यमेकैकं
भागं ब्रह्मणे दद्यात् । एवमपरदिगुत्पन्नं द्रव्यं पंचधा विभज्यैकैकं भागं प्रतिसुत्यमध्वर्यवे । उत्तर
दिगुत्पन्नं द्रव्यं सपुरुषं पंचधा विभज्यैकैकं भागं प्रतिसुत्यमुद्गात्रे दद्यात् । प्रतिपुरुषाणां महर्त्वि
ग्दक्षिणामध्यप्रकृतो विभागः । ब्राह्मणस्य पुरुषमेधे सर्वस्वं दक्षिणा । ततस्तदेव पंचधा विभ
ज्य प्रत्यहमृत्विग्भ्य एकैकस्य भागस्य दानं । सर्वस्वदानके पुरुषमेधेऽश्वदाभ्यग्रहणं प्रतिसु
त्यं भवति । अत्रातिरात्रसंस्थे मध्यमेऽहनि विशेषः । एकादशिनानामुपाकरणानंतरं आज्येन स
प्तं गृहीतेन देवसवितरिति प्रत्यृचं तिस्र आहुतीराहवनीये जुहोति । ततो ब्राह्मणादीनामुपा
करणं । ततोऽग्निमंथनं । ततः प्रतियूपमेकैकमेकादशिनं नियुज्य ब्राह्मणादीनष्टाचत्वारिं

Indira Gandhi National
Centre for the Arts

शतसंख्यान्पुरुषान्ब्र कामोपायोपसदसि त्वं तानग्निष्ठे यूपे नियुनक्ति। इतरेषु यूपेष्वेकादशैका
दश पुरुषान्वरणीयाननुपुरुषमित्यादीन्नियुनक्ति। तत्र वरणीयानुरधमित्येकादीन्नेकादश द्वितीये
दोषा ४ । मर्यादायै प्रश्नविवाकमित्यादीन् तृतीये ३ भायै दार्याहारमित्यादींश्चतुर्थे। वैरहत्याये। योगायायो
क्तारमित्यादीन्षष्ठे। ६ परिवक्तारायाविजातानित्यादीन् सप्तमे ७ ॥ पारायमार्गारमित्यादीनष्टमे ८
पक्वांय ग्लाविनेमित्यादीन्नवमे। ९। आस्कंदाय सभास्थाणुमित्यादीन् दशमे। १० महसे वीणावादमि
त्यादीन्नवमेष्वेगणकमभिक्रोशकं तान्महस इत्यं तानेकादशे। ११ एवं प्रतियूपमेकादश स्वे
कादशासु नियुक्तेषु रोधिकाः अवशिष्यंते तानद्वितीयोच्छ्रिते यूपे नियुनक्ति। तांश्च वीणावादं पाणि
घ्नं इत्यादींश्चतुर्दशरात्र्ये रुक्तंपिंगाक्षमित्यंतान्। ततोऽथैतानष्टौ विरूपानुक्तेमानालभत इति
दर्शनार्थोनुवादः। मागधादयस्तु पूर्वोक्ता एव गुणार्थं पुनः पठिताः नापूर्वाः। तेवै प्राजापत्याना
मिति मंत्रपाठात्प्राप्तानामनुवादो दर्शनार्थ इति हरिस्वामिनः। श्री अनंतयाज्ञिकास्त्वाहुः। मा
गधादयोप्यपूर्वा एव विधीयंते। अतादीर्घादयोऽष्टौ प्रजापतेः एव द्वात्रिंशा व्यतिरिक्ताः। माग २

धादयोप्येवं विधाः प्रजापतेरेव चत्वारः। एवं षड्विंशतिः शेषा इति। पूर्वोक्तैरेकादशभिः सह सप्त
त्रिंशद्द्वितीयोच्छ्रिते भवंति। एतत्तु युक्ततरमिवाभाति। प्राजापत्या इति पुनर्देवतासंबंधाभि
धानात्। पूर्वविहितेष्वेव मागधादिषु गुणविधाने चेतन्नोपपद्यते। तेषां देवतांतरसंबंध
स्य पूर्वमेव विहितत्वादिति। तत्र ब्रह्मणे जुष्टं नियुनज्मीत्यग्निष्ठे ब्राह्मणं प्रथमं नियुनक्ति।
सर्वेषामपि यूप एव बंधनं। क्षत्राय जुष्टमिति क्षत्रियं २ मरुद्भ्यो जुष्टमिति वैश्यं ३ तपसे जुष्ट
मिति शूद्रं। ४ तमसे जुष्टं इति तस्करं। चोरं ५ नगरकाय जुष्टमिति वीरहणं ६ पाप्मने जुष्ट
मिति क्लीबं नपुंसकं ७ आक्रयायै जुष्टं अयोगूं। अपसोगंतारः। ८ कामाय जुष्टं। पुंश्चलूं
अतिक्रुष्टाय जुष्टं मागधं। १० नृत्ताय जुष्टं। सूतं। ब्राह्मण्यां क्षत्रियाज्जातः ११ गीताय जुष्टं। शै
लूषं नृत्तादिशिक्षाकरं। १२ धर्माय जुष्टं सभाचरं सभायां चरतीति। १३ नरिष्ठायै जुष्टं। भीम
लं। भयंकरं। १४ नर्माय जुष्टं रेभं पुरुषं १५ हसाय जुष्टं। कारिं करणविशिष्टं। १६ आनं
दाय जुष्टं। स्त्रीसखं। स्त्रियाः सखायं। १७ प्रमदे जुष्टं। कुमारीपुत्रं कन्येवापरिणीतये

Indira Gandhi National Centre for the Arts

वजातं।१९ मेधायैजुष्टं। रथकारं २१ धैर्यायजुष्टं। तक्षाणं।२० तपसेजुष्टं। कौलालं कुलालापत्यं
।२१। मायायैजुष्टं। कर्मारं। कर्मकरणादक्षं।२२ रूपायजुष्टं। मणिकारं। रत्नमणिकर्त्तारं।२३ शु
भेजुष्टं। वपं पुरुषं वपतीति वपः।२४ शरव्यायैजुष्टं। इषुकारं। शरकर्त्तारं।२५ हित्यैजुष्टं। धनुःका
रं धनुःकर्त्तारं।२६ कर्मणेजुष्टं। ज्याकारं। प्रत्यंचाकर्त्तारं।२७ दिष्टायजुष्टं। रज्जुसर्जं। रज्जोः स्र
ष्टारं। निर्मातारं।२८ मृत्यवेजुष्टं। मृगयुं मृगग्राहकं।२९ अंतकायजुष्टं। श्वनिनं ३० नदीभ्यो
जुष्टं। पौंजिष्टं। पुंजिष्टस्यापत्यं।३१ ऋक्षीकाभ्योजुष्टं निषादं निषादात्मजं।३२ पुरुषव्याघ्रा
यजुष्टं। दुर्मदं।३३। गंधर्वाप्सरोभ्योजुष्टं। व्रात्यं। सावित्रीपतितं।३४ प्रयुग्भ्योजुष्टं। उन्मत्तं।३५
सर्पदेवजनेभ्योजुष्टं। अप्रतिपदं। प्रतिपदरहितं पुरुषं।३६। अयेभ्योजुष्टं। कितवं। धूतकर्त्ता
रं।३७ ईर्यतायैजुष्टं। अकितवं। अद्यूतकरं।३८ पिशाचेभ्योजुष्टं। विदलकारीं।३९। यातुधाने
भ्योजुष्टं। कण्टकीकारं।४० संधयेजुष्टं। जारं।४१ गेहायजुष्टं। उपपतिं।४२ आर्त्यैजुष्टं प
रिवित्तं परिवेदनकर्त्तारं ४३ निर्ऋत्यैजुष्टं। परिविविदानं। परिवेदनं कुर्वाणं।४४ अराध्यैजु ३

ष्टं। एदिधिषुःपतिं।४५ निष्कृत्यैजुष्टं। पेशस्कारीं। केशकारीं।४६ संज्ञायजुष्टं स्मरकारीं कामकारि
णीं ४७ प्रकामोद्यायजुष्टं। उपसदं उपसीदतीत्युपसत्।४८। एतानग्निष्ठे नियुनक्ति। अथाद्विती
ये यूपे। वर्णायजुष्टं। अनुरुधं। बलायजुष्टं। उपदां त्कपदः २ उत्सादेभ्योजुष्टं। कुब्जं अतिवक्रं
।३ प्रमुदेजुष्टं। वामनं।४ द्वाभ्योजुष्टं। स्त्रामं।५ स्वप्नायजुष्टं। अंधं।६ अधर्मायजुष्टं। बधिरं ७
पवित्रायजुष्टं। भिषजं वैद्यं।८ प्रज्ञानायजुष्टं। नक्षत्रदर्शं नक्षत्राणि दर्शयतीति गणकं दृष्टा
र्थीः ९ आशिक्षायैजुष्टं। प्राश्निनं प्रश्निवंतं।१० उपशिक्षायैजुष्टं। अभिप्राश्निनं।११। अथ तृतीये यू
पे। मर्यादायैजुष्टं। प्रश्नविवाकं। प्रश्नविवेचनं।१ अर्मेभ्योजुष्टं हस्तिपं चाजपालकं।२ जवायजु
ष्टं अश्वपं। अश्वपालकं।३ पुष्ट्यैजुष्टं। गोपालं।४ वीर्यायजुष्टं। अविपालं ५। पतेजसेजुष्टं
अजपालं ६ इरायैजुष्टं कीनाशं।७ कीलालायजुष्टं। सुराकारं।८ भद्रायजुष्टं गृहपं गृहपाल
कं।९ श्रेयसेजुष्टं। वित्तधं वित्तानि धीयंते येन सवित्तधः।१० आध्यक्षायजुष्टं। अनुक्षत्तारं
पुरुषमालभंते।११। । अथ चतुर्थे यूपे। भायैजुष्टं। दार्वाहारं। काष्ठानामाहर्त्तारं।१ प्रभायै

जुष्टं।अग्न्येधं।अग्नेर्वर्द्धकं२।ब्रध्नस्यविष्टपायजुष्टं।अभिषेक्तारं।वर्षिष्ठायनाकायजुष्टं।प
रिवेष्टारं।५मनुष्यलोकायजुष्टं।परिवेष्टारं।परिवेषणकर्त्तारं।४।देवलोकायजुष्टं।पेशितारं।
५।मनुष्यलोकायजुष्टं।प्रक।रेतारं।६सर्वेभ्योलोकेभ्योजुष्टं।उपसेक्तारंउपसेचनकर्त्तारं।७।
अवऋत्यैवधायजुष्टं।उपमंथितारं।उपमंथनस्यकर्त्तारं।८मेधायजुष्टं।वासःपल्पूलीं।
वाससांप्रक्षालनकर्त्रीं पुरुषीं।९।प्रकामायजुष्टं।रजयित्रीं।रंजनकारिणीं स्त्रियं।१०सं
तयेजुष्टं।स्तेनहृदयं।तस्करस्येव हृदयंयस्य।११।अथपंचमेयूपे।।वैरहत्यायजुष्टं।पि
शुनंपरछिद्रसूचकं१।विविक्त्यैजुष्टं।क्षत्तारं।प्रतिहारं।२।पद्मायजुष्टंअनुक्षत्तारं।प्रतीहार
सेवकं।३।बलायजुष्टंअनुचरं।४भूम्नेजुष्टं।परिस्कंदं।परितःस्कंदतिस्रवंतीतितथा।५प्रि
यायजुष्टं।प्रियवादिनं६अरिष्ट्यैजुष्टं।अश्वसादं।अश्वारोहणकर्त्तारं।७स्वर्गायलोका
यजुष्टं।भागदुघं।परिवेषकं।८।वर्षिष्ठायनाकायजुष्टं।परिवेष्टारं।९मन्यवेजुष्टं।अय ४
स्तापं।लोहतापकरं।१०।क्रोधायजुष्टं।निसरं।नितरांसर्त्तारं।११। ।७अथषष्टेयूपे।। ।।

योगायजुष्टं।योक्तारं।योजनकर्त्तारं।१शोकायजुष्टं।अभिसर्त्तारं।संमुखमागछंतं।२क्षेमा
यजुष्टं।विमोक्तारं।विमोचनकारं३उत्कूलनिकूलेभ्योजुष्टं।त्रिष्ठुस्थानंशीलवंतं।४।वपुषे
जुष्टं।मानस्कृतं।प्रजायाअभिमानस्यवाकर्त्तारं।५शीलायजुष्टं।अंजनीकारीं६निर्ऋत्यैजुष्टं।
कोशकारीं७यमायजुष्टं।असूं।नस्तत्इत्यसूःवंध्यातांअसूं।८यमायजुष्टं।यमसूं।अवि
प्रसवेत्रीं९अथर्वेभ्योजुष्टं।अतोचकांतिक्रांत्तप्रजांस्त्रियं।१०संवत्सरायजुष्टं।प[redacted]
यायिणीं।पर्यायोविद्यतेस्याःसापर्यायिणीनां।११। १७अथसप्तमेयूपे।। ।।परि
वत्सरायजुष्टं।अविजातां।अप्रसूतां१इदावत्सरायजुष्टं।पतित्वरयागमनशीलां२इद्व
त्सरायजुष्टं।अतिष्कद्वरीं३वत्सरायजुष्टं।विजर्जरां।४।संवत्सरायजुष्टं।पलिक्नीं।पलितां।
५।ऋतुभ्योजुष्टं।अजिनसंधं।साध्येभ्योजुष्टं।चर्मम्नं।चर्माभ्यासकरं७सरोभ्योजुष्टं।धै
वरं।धीवरस्यापत्यं।धीवरोदासः।कैवर्त्तदासधीवराविल्पमरः८उपस्थावराभ्योजु
ष्टं।दाशं।दाश्ट्टदानेक्षिप्।दशतीतिदाशस्तंदातरं।९वैशंताभ्योजुष्टं।वैदं।बिंदोरपत्यं।१०

Indira Gandhi National
Centre for the Arts

नडूनाभ्योजुष्टं।शौष्कलं।११।यथाष्टमेयूपे॥पारायजुष्टं।मार्गारं।१।अवारायजुष्टं।कैवर्त्तं।कै
वर्त्तस्वपितरं२।तीर्थेभ्योजुष्टं।आंद।३।विषमेभ्योजुष्टं।मैनालं।४।स्वनेभ्योजुष्टं।पर्णकं५।गुहाभ्यो
जुष्टं।किरातं।६।सानुभ्योजुष्टं।जंभकं।७।अनंतायजुष्टं मूकंपुरुषं।८।शब्दायजुष्टं।आडंबरा
घा।९।पर्वतेभ्योजुष्टं।किंपुरुषं।बीभत्सायैजुष्टं पौल्कसं१।वर्णायजुष्टं हिरण्यकारं।१०।तुला
यैजुष्टं।वाणिजं।११।अथनवमेयूपे।।पश्चादोषायजुष्टं।ग्लाविनं।१।विश्वेभ्योभूतेभ्योजुष्टं
सिध्मलं२।भूत्यैजुष्टं।जागरूकं३।अभूत्यैजुष्टं।स्वपनं।स्वापशीलं।४।आर्त्यैजुष्टं।जनवादि
नं५।व्यृद्ध्यैजुष्टं।अपगल्भं६।शरायजुष्टं।प्रच्छिदंप्रच्छेदनकर्त्तारं।७।अक्षराजायजुष्टं।कितवं।
८।कृतायजुष्टं।आदिनवदर्शं।९।त्रेतायजुष्टं।कल्पिनं।१०।द्वापरायजुष्टं।अधिकल्पिनं।११।
आस्कंदायजुष्टं सभास्थाणुं१।मृत्यवेजुष्टं।गोव्यच्छं२।अंतकायजुष्टं।गोघातं।गोहंतारं।
३।क्षुधेजुष्टं।यःपुरुषोगांभिक्षमाणोयाचमानोविकृंतनं।छेदनंकुर्वाणामुपतिष्ठति।स
मीपेतिष्ठतितंस्वयंबुभुक्षितं पुरुषंक्षुधेदेवतायैआलभते।४।दुष्कृतायजुष्टं।चरकाचा ५

र्यं५।पाप्मनेजुष्टं।सैलगं।सैलगायत्तं६।प्रतिश्रुत्कायैजुष्टं।अर्त्तनं।७।घोषायजुष्टं।भषं।८।अं
तायबहुवादिनं९।अनंतायजुष्टं।मूकपुरुषं।१०।शब्दायजुष्टं।आडंबराघातं।११।अथैकादशे
यूपे।।महसेजुष्टं।वीणावादं।१।क्रोशायजुष्टं।तूणवध्मं।२।अवरस्परायजुष्टं।शंखध्मं।शं
खवादनकर्त्तारं।३।वनायजुष्टं।ग्रावल्पां।८।एकंग्रामण्यं९।द्वितीयंगणकं१०।तृतीयमभि
क्रोशकं११।तानेतान्त्रीनुपरृन्महसेजुष्टमित्यालभते।।अध्यायविशेषानध्यायसमाप्ति
पर्यंतान्द्वितीयोद्धितेयूपेआलभते।एकंवीणावादं१।द्वितीयंपाणिघ्नं२।तृतीयंतूणवध्मं
३।तान्त्रीन्नृत्तायजुष्टमित्यालभते३।आनंदायजुष्टं।तलवं।४।अग्नयेजुष्टंपीवानं।स्थू
लं५।पृथिव्यैजुष्टंपीठसर्पिणं।६।वायवेजुष्टंचांडालं।चांडालकर्मणांसाक्षाच्चांडालस्यापुत्रं
त्वा।७।अंतरिक्षायजुष्टंवंशनर्त्तिनं।वंशंगृहीत्वानर्त्तनशीलं।८।दिवेजुष्टं।खलतिं।अखलो
मकशिरस्कं।९।सूर्यायजुष्टं।हर्यक्षं।हरिताक्षं।१०।नक्षत्रेभ्योजुष्टं।किर्मिकं।कर्बुरवर्णं११।चं
द्रमसेजुष्टं किलासं।१२।अह्नेजुष्टंशुक्लंशुक्लवर्णंपिंगाक्षं पुरुषं।१३।रात्र्यैजुष्टं।कृष्णाव

Indira Gandhi National Centre for the Arts

र्गां पिंगाह्नं।१४।अथानंतरमेतान ष्टौ विरूपान्परस्परं विरुद्धरूपानूपञ्च नालभते।अ
ति दीर्घं१ अतिह्रस्वं२ अतिस्थूलं३ अतिकृशं४ अतिशुक्लं५ अतिकृष्णं६ अतिकुल्वं रोमर
हितं७ अतिलोमशं सर्वशरीरव्यापिरोमयुक्तं ८ एते अष्टावशूद्रा अब्राह्मणाः पशवो भवंति।ए
ते अष्टावपि प्राजापत्या प्रजापतिदेवताः। अथ एतउत्तमानालभत इति प्रकृत्यादीर्घ लुर्दश।अ
तिदीर्घादयोष्टौ।एवं द्वाविंशतिः शेषाः।एकोमागधः।पुंश्चली द्वितीयः।कितवस्तृतीयः।क्ली
बश्चतुर्थः।एते चत्वारोपि अशूद्रा अब्राह्मणाः शूद्रब्राह्मणव्यतिरिक्ताः।ते चत्वारोपि प्राजा
पत्याः प्रजापतिदेवताः।पूर्वैः सह तेषाद्विंशतिर्भवंति।एते सर्वे।द्वितीयोच्छ्रिते नियुनक्ति।सर्वेषां
नियोगानंतरं तान्नियुक्तान्पुरुषान्सहस्रशीर्षापुरुष इति षोडशेनानुवाकेन होतृवदभि
ष्टौति दक्षिणात उपविष्ट एव।होतृवदिति प्रथमोत्तमयोस्त्रिवचनं ऋगंतानां प्रणवेन सं
धानं च सहस्रशीर्षाः पुरुषो३ पुरुष एवेदं सर्वं होता३ तावानस्येत्यादि एवंशंसन धर्मेणाभि ६
ष्टौ।ततः आलंभनक्रमेण यथादेवतं प्रोक्षणादि आप्रीणादीनां पर्यग्निकरणानंतरनि

दं ब्रह्मणे इदं क्षत्राय त्येवं सर्वेषां यथास्वं देवतोद्देशेन त्यागः।सर्वान् ब्राह्मणादि ब्राह्मणादी
नां पर्यग्निकरणानंतरमिदं ब्रह्मणे इदं क्षत्राय त्येवं सर्वेषां यथास्वं देवतोद्देशेन त्यागः।सर्वा
न् ब्राह्मणादीन्यूपेभ्यो विमुच्योत्सृजति।तत एकादशिनेः पशुभिः संज्ञपनादि प्रधानयागांतं
वनस्पतियागं कृत्वा प्राक्स्विष्टकृतः अध्वर्युराज्यं संस्कृत्य स्रुचा गृहीतमाज्यं गृहीत्वा गृही
त्वा पुरुषदेवतास्या ब्रह्मादिभ्य आवेहनीये जुहोति।ब्रह्मणे स्वाहा।१ क्षत्राय२ मरुद्भ्यः३ तप
से४ तमसे५ नारकाय६ पाप्मने७ आक्रयायै८ कामाय९ अतिकुष्टाय१० नृत्ताय११ गीता
य१२ धर्माय१३ नरिष्ठायै१४ नर्माय१५ हसाय१६ आनंदाय१७ प्रमदे१८ मेधायै१९ धैर्याय२०
तपसे२१ मायायै२२ रूपाय२३ शुभे२४ शरव्यायै२५ हेत्यै२६ कर्मणे२७ दिष्टाय२८ मृत्यवे
२९ अंतकाय३० नदीभ्यः३१ [illegible]बीकाभ्यः३२ पुरुषव्याघ्राय३३ गंधर्वाप्सरोभ्यः३४ प्रयुग्भ्यः३५
सर्वदेवजनेभ्यः३६ अयेभ्यः३७ ईर्यतायै३८ पिशाचेभ्यः३९ यातुधानेभ्यः४० संध्वये४१ गेहा
य४२ आर्त्यै४३ निर्ऋत्यै४४ अराध्यै४५ निष्कृत्यै४६ संज्ञानाय४७ प्रकामोद्याय४८ वर्णाय५०
उत्सादेभ्यः५१ प्रमुदे५२ द्वार्भ्यः५३ स्वप्नाय५४ अधर्माय५५ पवित्राय५६ प्रज्ञानाय५७ आशिक्षा

Indira Gandhi National Centre for the Arts

ये ५८ उपधि क्षाये ५९ मर्यादाये ६० अप्रेमेभ्यः ६१ झवाय ६२ पुरुषे ६३ वीर्याय ६४ तेजसे ६५ इराये ६६
कीलालाय ६७ भद्राय ६८ श्रेयसे ६९ आध्यक्षाय ७० भीये ७१ प्रभाये ७२ अधस्पधियाय ७३ ववि(षि)
युनाकाय ७४ देवलोकाय ७५ मनुष्यलोकाय ७६ सर्वेभ्यो लोकेभ्यः ७७ अवकृत्ये वधाय ७८ मेधाय
७९ प्रकामाय ८० कृतये ८१ वेरहत्याय ८२ विविक्त्यै ८३ ओयद्रूप्याय ८४ बलाय ८५ मृत्यवे ८६ द्रविया
य ८७ अरिष्टये ८८ स्वर्गायलोकाय ८९ ब्राह्मणायनाकाय ९० नन्चवे ९१ क्रोधाय ९२ योगाय ९३ शोका
य ९४ क्षेमाय ९५ उत्कूलनिकूलेभ्यः ९६ वपुषे ९७ शीलाय ९८ निकृत्ये ९९ यमाय १०० यमाय १ अ
घर्वेभ्यः २ संवत्सराय ३ परिवत्सराय ४ इदावत्सराय ५ इद्वत्सराय ६ वत्सराय ७ संवत्सराय ८ ऋभुभ्यः
९ साध्येभ्यः १० सरोभ्यः ११ उपस्थावराभ्यः १२ वैशंताभ्यः १३ नड्वलाभ्यः १४ पाराय १५ आवाराय १६
तीर्थेभ्यः विषमेभ्यः १९ स्वनेभ्यः गुहाभ्यः २० सानुभ्यः २१ पर्वतेभ्यः २२ बीभत्सायै २३ वरूराय २४
तुलायै २५ पश्चादोषाय २६ कृताय २७ त्रेतायै २८ द्वापरायै २९ आस्कंदाय ३९ मृत्यवे ४० अंतका ७
य ४१ दत्तुध ४२ दुष्कृताय ४३ पाप्मने ४४ प्रतिश्रुत्कायै ४५ घोषाय ४६ अंतकाय ४७ अनंताय ४८ शब्दा
य ४९ महसे ५० क्रोशाय ५१ अवरस्पराय ५२ वनाय ५३ अन्यतोरराणाय ५४ नमीय ५५ हसाय ५६ या

से ५७ त्रिःमहसे ५८ त्रिःनृत्ताय ६३ आनंदाय ६४ अग्नये ६५ पृथिव्ये ६६ वायवे ६७ अंतरिक्षाय ६८ दि
वे ६९ सूर्याय नक्षत्रेभ्यः ७० चंद्रमसे ७१ अह्ने ७२ रात्र्ये ७३ अष्टकृत्वः प्रजापतये। चतुष्कृत्वः प्रजापतय
इति १९५ एता आज्याहुतीर्जुहोति एतैः स्वाहाकारांतेर्मंत्रैः। ततः स्विष्टकृदादि यज्ञायज्ञियांते त्र
योदशविग्रहाः। ततः षोडशी। ततस्त्रयोरात्रिपर्यायाः। ततः आश्विनं। तस्यान्त्रप्रज्ञालनांतेनुयाजा
दि पत्नीसंयाजांतं। व्युहनेएकादशिनीदेवतानां संकीर्तनं। पुरुषसंबंधिकर्मणामनुसरणत्वात्।
ततश्चतुर्थेहन्युक्थ्यः। पंचमेहन्यग्निष्टोमः। तत्राश्वस्तुत्याद्यभावः। तत्र पत्नीसंयाजांते दक्षिणा
ग्निहोमयवभृथानंतरं समिदाधानं। ततएकवद्बर्हिर्होमादि पूर्णपात्रविमुक्तमकर्मापव
र्गति। बर्हिर्होमांतमेवेति केचित्। ततः स्नुवाहुत्या पुदनीयांतं। एकादशानूबंध्याः। तासां
मध्ये तिस्रो मैत्रावरुणाः। तिस्रो वैश्वदेव्यः। पंचबार्हस्पत्याः। त्रयएवपशुपुरोडाशाः। एकदे
वतानां सहप्रदानं। त्रेधा उक्थ्युदवसानीयाः। तदंते यजमान आत्मन्नग्नीन्नयंते यो निरिति
मंत्रेण समारोप्याङ्यः संभृत इत्यनुवाकेनाध्यायसमाप्तिपर्यंतेनसूर्यमुपस्थायपस्थाय

Indira Gandhi National
Centre for the Arts

पश्चादव लोकनमकुर्वन्नरण्यं गच्छेत्। न ग्रामं प्रतियावज्जीवमागच्छेत्। सर्वसंगपरित्यागं कृ
त्वा चतुर्थमाश्रममाश्रयेदित्यर्थः। अत्र शांखायनः। गार्हपत्ये धरारणिमनुप्रहृत्याहवनीय
उत्तरारणिमात्मन्यग्नीन्समारोप्यारण्यं व्रजेदिति। । अथ पुरुषमेधानंतरं यदि पुनर्गृ
मवासेच्छा तर्हि त्रेधा तद्वंते सायमाहुतिं हुत्वारण्योरग्नीन्समारोप्याग्ने संभृत्य इत्युत्तर
नारण्योना दित्यनुपस्थाय देवयजनमादीप्य गृहेषु प्रत्यागच्छेत्। ततः पुनर्यथायज्ञानां क
रणेच्छा भवति तां कुर्यात्। इमं पुरुषमेधे ज्ञानप्रियानूचानेभ्य एव पाठयेत्। अन्यतोयंत
स्वतः सर्वेभ्यः। गृहे समागत्य निर्मथ्याग्निस्थापनं कुर्यात्॥ ॥इति पुरुषमेधः समाप्तः॥ ॥
अथ सर्वमेधस्य पद्धतिर्लिख्यते॥ ॥सर्वकामस्य यजमानस्य सर्वमेधसंज्ञको यज्ञो भवति। त
त्र द्वादशाहस्य धर्मा भवंति अहर्गणत्वात्। तेन द्वादश दीक्षाः द्वादशोपसदः दश सुत्याः। त
त्र प्रथमोग्निष्टुदग्निष्टोमः। ततः इंद्रस्तुत्। ततो वैश्वदेवस्तुत्। ३ ततः सूर्यस्तुत्। ततो वैश्व ८
देवस्तुत्। एते त्रयः उक्थ्याः ४ ततो महाव्रतं। ५। ततो वाजपेयः। ६। ततोप्तोर्यामः ७ ततस्त्रिणवस्तो

मउक्थ्यः। ततस्त्रयस्त्रिंशस्तोम उक्थ्यः ९ ततो विश्वजित्सर्वपृष्ठोऽतिरात्रो दशमइति। अथ वाम
हाव्रतस्य स्थाने अश्वमेधस्य मध्यमहस्तद्धर्मकं कर्तव्यं। वाजपेयस्य स्थाने विकल्पेन पुरुषस्य
मध्यममहरिति रात्रसंस्थं सधर्मकं। अत्र चैत्रशुक्लपक्षे मातृश्राद्धं। प्राजापत्य इष्टकापशुः।
ततऊर्षौ संभरणं। चैत्रशुक्लपक्ष एवर्त्विग्वरणं। सर्वमेधेनाहं यक्ष्य इति वरणं। एकशतविधो
ग्निरत्र भवति। आग्निकं द्वादशाहिकं च सर्वं कर्म द्वादशाहवद्भवति। न्यग्रोधस्य पवित्रक
हा व्याख्याताः। उपसद्याग्नेयीस्रुवस्मरणात्। अग्निष्टुतो मुख्यत्वेन तद्धर्मानुग्रहात्। अग्न आ
गच्छ रोहिताभ्यां बृहद्भानो धूमकेतो जातवेदो विचर्षणे। आंगिरस आस्त रांगिरसक्रवाराः।
९ द्वादशास्सुत्यामागच्छ मघवन्नग्नये वृत्रहन्नागच्छेति। एको यूपः स च सप्तदशारत्निः वाज
पेयस्य षष्ठाहः पदे। तस्य सप्तदशारत्नि यूपनियमात्। इतरेषामह्नामपरिमितपदाश्र
येणानाविरोधात्। पर्ता मनेनुग्राह्यतरव। आश्वमेधिकं मध्यमं व्रतस्थाने हृत्यास्मिन्प
क्षे अश्वमेधवदेकविंशतिर्यूपाः। तत्र मध्यमः खादिरो बहूनामनुग्रहात् इति विशेषः। ६

Indira Gandhi National
Centre for the Arts

तरेविंशतिरश्वमेधवत्। मध्यमस्याप्रमाणमश्वमेधवदेव भवति अविरोधात्। अग्नीषो
मीयादिने सर्वयूपानामवटहोमं तं पदार्थानुसमयेन। ततो मध्यमस्य सर्वे वग्रहणं तं कृत्वा
पार्श्वयूपानां मंत्रेनादिच बालेक्षणं तमग्रकर्त्तव्यं। दक्षिणोत्तराणां यूपानां परिव्ययणादि
श्व एव अग्रपश्चालंभाभावात्। अत्र सर्वेषु हः सुत्योमायनं चेत्यनेनैकपक्षेण सवनीयाभ
वंति। शतपथे प्राश्वमेधिके मध्यमे पंचमेहनि तस्मिन्नश्वमेध्यमालभते ति पौरुषमेधि
केमध्यमे षष्ठेहनि तस्मिन्नमेध्यान्पुरुषानालभत इति पश्वंतरविधानादैंद्राग्निका
दशिनी पक्षयोरसंभवात्। तेन संस्थानुसारेण यथास्वं प्रतिसुत्यं सौमायनपशवः सेच
नीयाभवंति। वैशाखायपोर्णमास्यामग्निष्टुदग्निष्टोमः तत्राग्नेयः सवनीयः। अत्र सर्वे
ग्रहा आग्नेयाः भवंति सर्वाः पुरोरुच ऋग्यूपाग्रहग्रहणमंत्रा अश्वाजरास इत्याद्याः स
न्नदग्ना आग्नेयाः प्राकृतमंत्रस्थाने भवंति। इतरमंत्रेषु प्राकृतदेवतायदस्थाने पदप्र ९
योगः। शांखायनवचनात्सवनीयपुरोडाशादीनामप्याग्नेयत्वं। ततश्च वसापाकरणं
ग्निर२

तंत्रनिर्वपणप्रोक्षणाविभज्यालंभप्रोणदानादिंद्रपदस्थाने निपदप्रयोगः। वसापाकरणो
अग्नयेसरस्वतिच। तभागं अग्नये ~~जुष्टमितिपुरोडाशस्य~~ मित्रावरुणावनेभागं। अग्नेः सरस्व
ति चाति भागं। अग्नये मित्रावरुणावने भागं। अग्नेः सरस्वतिवतस्त्वा भागमित्यातंचने। निर्वा
प अग्नयेजुष्टमितिपुरोडाशस्य अग्नयेहरिवत इतिधानानां। अग्नयेयूजएवते इति करंभस्य
एवं सत्रोह्यं। तत्र ग्रावा वग्रादानमंत्रे। गंभीरमिम मध्वरं कृध्यग्नये सुश्रन ममिति। सोममान
मंत्रेषु। अग्नये त्वावसुमते रुद्रवते। अग्नये त्वादित्यवते। अग्नयेत्वाभिमाति घ्न इति प्राणया
चने। नत्वदन्यो मघवन्नस्ति मर्डिताग्ने ब्रवीमि इति सोमायापने। अंशुरंशुष्टे देवसो
माप्यायतामग्नयएकधनविदे। आ तुभ्यमग्निः प्यायतामा त्वमग्नये प्यायस्वेति। उपांशुग्र
हहोममंत्रे। स्वाहा त्वा सुभवाग्नये इति। इदमग्नयइ तित्यागः। उपमार्जने। अग्निभ्यस्त्वाम
रीचिषेभ्य इति। अंतर्यामग्रहे। उपयामगृहीतो स्यंतर्यच्छ मघवन् पाहि सोमं अंतर्याम मघव

Indira Gandhi National Centre for the Arts

मादयस्व। स्वाहा त्वा सुभवः सूर्यायेति ऐंद्रवायवग्रहणं। अंचायविस्पस्पाः स्थाने अस्याजरा
सइत्येका। नमो मा अग्नये त्वेति गृहीत्वा अपगृह्य पुनर्ग्रहणं हरयो धूमकेतवो यगग्नयः।
उपयामगृहीतो स्यग्नये ग्निभ्यां त्वा। एष ते योनिः सयोषोभ्यां त्वेति सादनं। ततो मैत्रावरुणग्र
याग्रमादाय प्रनानो मित्रावरुणा० दम। उपयाम० स्यग्निभ्यां त्वा। ततो ग्नेर्ऊर्ध्वयशायावयमि
तिपयसा श्रयणं। अत्र यंत्रे तां धेनुमग्नी युवं नक्षत्रैः। परिमार्जनं। एष ते योनिर्वीरतां पाहि। ऐं ता पु०
ततो मंथिग्रहणं। अयमिह० विशे। उपयामगृ० मर्को यत्वा मनोनयेयि तिस क्तुभिः सं श्रयणं।
सा ८ एष० आपाहीत्सादनं। ततआग्रयणग्रहणं। त्रीशिशतात्री० दर्यंत। उपयामगृहीतोस्याग्रय
णोसि० सुभूताय वपते। विश्वेभ्यस्त्वाग्निभ्यः परिमार्जनं एष० निवि विश्वेभ्यस्त्वाग्निभ्य इति
सादनं। ततउक्थ्यग्रहणं। उपयाम० स्यग्नये त्वा बृहद्वते। मि। पत्नेग्ने बृहद्वयस्तस्मै त्वा १०
विष्णवे त्वा। एष ते योनिरुक्थ्येभ्यस्त्वेति सादनं। ध्रुवग्रहणं मूर्धानमिति प्रकृतिवत्। अ

श्विनग्रहणं। युक्ष्वा हि देव० सदः। उपयाम० स्यग्निभ्यां त्वा। एष ते योनिरग्निभ्यां त्वेति साद
नं। प्रचकाशा याचने। यो चेमे वर्चो० ध्रुवन्तामे यमी सुस्त्वेति। सर्वं त्रिषु। दैवतेषु। अन्यत्प्रकृति
वत्। होत्रादिवरणे। अग्निर्होता। अग्नी अध्वर्यू आध्वर्यवात्। अग्नी प्रस्तोता प्राप्रस्त्रात्। अ
ग्निर्ब्रह्मा ब्राह्मणात्। अग्नयः पोत्रात्। अग्निर्नेष्ट्रात्। ग्रावाणो नेष्ट्रात्। सवनीयपुरोडाशयागे प्रातः
प्रातः सावस्याग्नये पुरोडाशानामनुब्रूहि। अग्नये पुरोडाशान्प्रस्थितान्प्रेष्येति। इदमग्न
य इति त्यागः। सवनीयपुरोडाशादिषु पिशाः स्वायनवचना हूह एव युज्यते। द्विदेवत्यप्रचारे
अग्नये ग्निभ्यामनुब्रूहि। अग्नये ग्निभ्यां प्रेष्य। शेषा से के अग्निभ्यस्त्वेति। एवं सर्वशेषासे
केषु। मैत्रावरुणाश्विनयोः अग्निभ्यामनुब्रूह्यग्निभ्यां प्रेष्येति। शुक्रामंथि प्रचारे। प्रातःप्रा
तः सुतस्य सवो म धुश्च्युतो ग्नये सोमान्प्रस्थितानिति प्रेषः। होमंप्रेसाद्यधमेत्पत्रेत स्याग्न
ये सुतमानुहो न स्वाहेति विशेषः। इदमग्नय इति सर्वत्र त्यागः। प्रशास्तृचमसयागे इदमग्नि
भ्यां। पोतृचमसयागे इदमग्निभ्यः। अच्छावाकस्येदमग्निभ्यां। शेषेष्विदमग्नय इति। स्तु

Indira Gandhi National
Centre for the Arts

याजेष्वपि वचनानि प्रकृतिवत्प्रातिपदिकं सर्वं आग्निपदं। ततऐंद्राग्निग्रहणं। अग्निर्वृत्राणि
आजुतः। उपयामः स्यग्निभ्यां त्वा। परिमार्जनं प्रदक्षिणावृत्तिः। एषतेयोनिरग्निभ्यां त्वेति सादनं। इद
मग्निभ्यां इति त्यागः। अन्यत्प्रकृतिवत्। वैश्वदेवग्रहणं विश्वेभिः सोम्यं मभिः। उपयामगृहीतो
सि विश्वेभ्यस्त्वाग्निभ्यः। एषतेयोनिर्विश्वेभ्यस्त्वाग्निभ्य इति सादनं। इदं विश्वेभ्योग्निभ्य इति।
उक्थ्यविग्रहेषु देवेभ्यस्त्वेति पक्षे। अग्निभ्यस्त्वा देवाव्यमिति। पक्षांतरे अग्निभ्यां त्वा देवाव्य
मिति प्रथमे। अग्नये त्वा देवाव्यमिति द्वितीये। अग्निभ्यामिति तृतीये। तथैव त्यागः। विश्वे
देवा मरुत इत्यत्र विश्वेग्न्योरस्मान्नस्मिन्नव यमग्नीनास्तु मतोस्यामेत्यूहः। माध्यंदिनेप्यभि
षवे प्रातःसवनवत् द्विरूप इति शुक्रग्रहणं। अयमिहेति मंथिनः। त्रीणि शते त्वाग्रयणस्य
एषु प्रातःसवनवत्सर्वं। ततो मरुत्वतीयस्य ग्रहणं। आयदिषेनृपतिं० यक्षा। उप० स्यग्नये
त्वा मरुत्वते। एषतेयोनिरग्नये त्वा मरुत्वतः इति प्रातःसवनदुक्थ्य ग्रहणं। सवनीयया
गे प्रस्थितयागे च प्रातःसवनवत्। प्रशास्त्रादिचमसयागे विदमग्नय इत्येवत्यागः। मरुत्व ११

तीयानुवाचने। अग्नये मरुत्वतेनुवाचने। अग्नये मरुत्वतेनुब्रूहि। अग्नये मरुत्वते प्रेष्येति। मह
मरुत्वतीयग्रहणं। अग्ने शर्द्ध महते० महांसि। उपस्यग्नये त्वा मरुत्वते। एषतेयोनिरग्नये त्वा मरुत्वे
ते। कुं ठमरुत्वतीग्रहणं पि आग्नीनां त्वोजस इति तथैव त्यागः। माहेंद्रग्रहणं। त्वां हि मंद्र० तमाः। उप०
स्यग्नये त्वा। एष० निरग्नये त्वेति। सौम्यस्य वित्तादित्यस्य स्थाने आग्नेयस्य विलादिति न तस्याग्नये उ
ष्मिति तद्ग्रहणं। शुधि श्रुत्कर्ण० अध्वरमग्निभ्यस्त्वा। ततस्तु शोचं तद्धयि दध्याश्रयणं विश्वेषा
मदिति० जातवेदा अग्निभ्यस्त्वा। अपांशुसवने नाभिस्रावेण विः वस्व न्नग्न एषते सोमपीथ इति। अ
नुवाचने अग्निभ्योनुब्रूहि अग्निभ्यः प्रेष्येति ये प्यतितिप्रकृतिवत्। त्यागे चाग्निभ्य इति। तृतीय
सवने त्रीणि शते त्वाग्रयणग्रहणं प्रातःसवनवत्। प्रस्थितयागे तीव्रां आशीर्वतोग्नये सोमानि
ति। सवनीययागे प्रातःसवनवत्। प्रशास्त्रादिचमसयागेषु प्रातःसवनवत्यागः। प्रातिपदिकमा
त्रोहेन सावित्रग्रहणं। महो अग्नेः समि० णीमहे। उपया० स्यग्नये सिवतो० देवाय त्वाग्नये। देवाया
ग्नयेनु० दिवावाग्नये प्रेष्येति। त्यागे व्येवं। महावैश्वदेवग्रहणं। उपयाम० ग्नि सुशर्मा० नमः। अग्निभ्य

Indira Gandhi National Centre for the Arts

स्त्वा। एषतेयोनि र्विश्वेभ्यस्त्वाग्निभ्यः धृतयागेसोम्ययागेच शांखायनसूत्रादाग्नेयैत्वं। आग्नेयस्य
यजेति। सोम्यस्य यज्ञेत्यस्थाने। अग्निमारुते इदमग्निभ्यः इतित्यागः। ऊहने अग्नेर्वनस्पते र ग्नेर्वसु
मतरति विश्वादेव्याच। तोग्नेरुजितंति। अग्निर्वनस्पतिरग्निर्वसुमानित्यादिदेव्यानग्निस्तपेति।
हारियोजनग्रहणे। उपयामगृहीतोसिहरिरसिहारियोजनोहरिभ्यांत्वाहर्योर्धानास्थसहसोमाग्न
ग्नयइतियतस्पर्यंतं सर्वत्रदेवतापदस्थानेग्निपदप्रयोगः। अत्रसर्वेभ्रह्मसुदिग्विनय सुमयेस
र्वाभ्योदिग्भ्योयद्रव्यमानीतंभूमिपुरुषसहितंब्राह्मणस्ववर्जितं। तद्दशधाविभज्यपाश्वमेधवत्प्र
त्यहं दशमविभागस्यदक्षिणात्वेनदानं। प्राचीदिग्द्रव्यस्यदशमंभागंमध्वर्योः। दक्षिणादिग्द्रव्य
स्यदशमंभागंब्रह्मणः। अपरदिग्द्रव्यस्यदशममध्वर्योः। उदीचीदिग्द्रव्यस्यदशममुद्गातुरिति।
प्रतिपुरुषाणां मुख्यभागमध्येप्राकृतोविभागः। अत्रद्वादशाहवदंत्यवर्जितानां सर्वेषामप्यपत्नी
संयाजांततामाद्यंदिनेवनीयवसतीवरीणांग्रहणं अनुक्रामतायन्वहं अस्तमितेसर्वेष्वग्निषु १२
यजमानकर्तृकंसमिदाधानं। हरियोजनांतेश्वः सुत्यामितिप्रेषः। अप्यमांत्यवर्जंबहिष्पवमा

नानां सदस्युपाकरणं इत्यादिभवति। । इत्यग्निष्टुत्। । अस्यचैकाहरूपस्य प्रथमकृयोगेसो
मक्रयेणाभिमंत्रणे पूषाध्वननस्यात्वग्नये ध्यक्षाय। अनुत्वा मछेह्यग्नयेसोमतिनूहः। इंद्रस्य
योनिरसीइंस्याकमित्यत्रैवोहाभावः। इंद्रपदस्यदेवतावाचित्वाभावात्। अंशुरित्यत्रकोकः। उपर
वपरिलेखे। वृहतीमग्नयेवाचंवदेति। प्रातर्वैशाखक्लृप्तप्रतिपदिइंद्रस्तुद्धयसस्थोदिती
यमहः। आग्नेयेंद्राग्नोह्येवसनीयोपशु। अत्रसर्वेग्रहाऐंद्राग्नास्तग्रहणमंत्राः। प्राकृतमं
त्राणांस्थानेआपश्विस्त्विप्युरिव्याघ्राः सप्तदशैंद्राभवंति। लत्रयेषुमंत्रेषुस्वभावत इंद्रपदं ना
स्ति। तत्रोहोभवति। स्वाहात्वासुभवेंद्राय। इदमिंद्रायेतित्यागः। देवेभ्यस्त्वामरीचिपेभ्यः। एवमं
तर्यामेपि। ऐंद्रवायवग्रहणे। आपश्विस्त्विप्युः। विवाजानिंद्रायत्वा। अपगृह्यपुनर्ग्रहणे। गावदु
पावतांरूपयां। उपयामगृहीतोसींद्रायत्वेंद्रायेंद्रायत्वा। एषतेयोनिः सजोषोभ्यांत्वा। मैत्राव
रुणग्रहणे। देयघस्तूरं भगः। उपः सींद्राभ्यांत्वाग्रयणे। तांधेनुर्मिंद्रेयुवंनइति। एषतेयोनि
रिंद्राभ्यांत्वा। शुक्रस्यतंप्रत्नथा। मंथिनोयंवेनइति। प्रकृतिवत्। । आग्रयणस्य। आतिष्ठ

Indira Gandhi National
Centre for the Arts

तं परि तस्थौ। उपयामगृहीतोस्याग्रयणो० सुभूताय पवते विश्वेभ्यस्त्वं देवेभ्यः एष ते योनिर्विश्वेभ्यस्त्वं
देवेभ्यः॥ ॥ध्रुवग्रहणं। ध्रुवो महेमं दमानावा० सपर्यतः। उपयामगृहीतोसि ध्रुवोसीति प्राकृत
वत्। एष ते योनिरिंद्राय त्वेति सादनं। ।आश्विनस्य। आ सुते सिंचत श्रियं। उप० सींद्राभ्यां
त्वा० एष इंद्राभ्यां त्वा द्विदेवत्येषु इति श्रुवन्नैंद्रमीत्यस्येति प्रयोगः। द्विदेवत्यप्रचारे। इंद्रायेंद्राभ्या
मनु०। इंद्रायेंद्राभ्यां प्रेष्य। शौवासके इंद्रेभ्यस्त्वा। मैत्रावरुणाश्विनयोरिंद्राभ्यामनुब्रूहींद्राभ्यां
प्रेष्येति। प्रशास्त्रादिचमसेषु याजेषु त्यागे देवतापदमात्रस्य विपरिणामो न वचनानां। आग्नेय
ग्रहणं आग छेति छंदोगसूत्रे दर्शनात्। ऋतुयागेष्वप्येवं। ऐंद्राग्नग्रहणं। वृत्रहन्निध्म। सखा॥
उप० सींद्राभ्यां वैश्वदेवग्रहणं। इंद्रे हि मत्स्यं० धसो। उप० सि विश्वेभ्यस्त्वं देवेभ्यः। एष ते योनिर्वि
श्वेभ्यस्त्वं देवेभ्यः। उक्थ्यविग्रहेषु देवेभ्यस्त्वेति पदे इंद्रेभ्यस्त्वा देवाव्यमिति। पक्षांतरे प्रथमे इंद्राभ्यां
त्वा देवाव्यमिति। द्वितीये तु प्राकृतं। तृतीये इंद्राग्नीभ्यां त्वा देवाव्यमिति। द्वितीये तु प्राकृतं। तृ
तीये इंद्राग्निभ्यां त्वेति। माध्यंदिने पशुकामं चिनोः प्राकृतिवत्। आग्रयणस्यातिरिक्तमिति। १२

मरुत्वतीयस्येंद्रो वृत्रमवृणोदिति। महामनुकृत्वतीयस्य कुतस्त्वमिंद्रेति। माहेंद्रस्य महां इंद्रोय
ओजसेति विशेषः। नतु महां इंद्रो नृवदिति। उपयामगृहीतोसि महेंद्राय त्वेति ग्रहणसादने।
इदं महेंद्रायेति त्यागः। आदित्यग्रहणं प्रकृतिवद्धोमंत्रोग्रं ते इंद्रेभ्यस्त्वेति विशेषः। श्रयणेतु अ
तत्र इंद्राय। दधुक्षन्निंद्रेभ्यस्त्वा। उपांशुसवनेन मिश्रणं। विवस्वन्निंद्र एष त इति। अनुवाचने
इंद्रेभ्योनुब्रूहि इंद्रेभ्यः प्रेष्य। तृतीयसवने पातिरिक्तत्वात् आग्रयणाग्रहणं। प्रातःसवनवदुक्थ्यग्र
हणं। प्रशास्त्रादिचमसेषु प्रातिपदिकमात्रोहेन त्यागः। सावित्रग्रहणे इमं तेधियं० तनुउप०
सि देवाय स्त्वेंद्राय। देवायेंद्रायानुब्रूहि देवायेंद्राय प्रेष्य। महावैश्वदेवग्रहणं। विश्वेउप० सि
सुशर्मा० मः विश्वेभ्यस्त्वं देवेभ्यः एष० विश्वेभ्यस्त्वं देवेभ्यः। अग्निमारुते त्यागे इदमिंद्रेभ्यः। पात्नी
वतग्रहहोमे। इंद्राउ पत्नीवत्सजूर्देवेनेति। इदमिंद्राय। अन्यद्दक्षिणादानादि सर्वं प्रथमा
सुत्यावत्। ।इतींद्रस्तुत्। ।ततो वैशाखशुक्लद्वितीयायां स्तर्यसुदुच्छ्यस्तृतीयमहः। आग्ने

Indira Gandhi National
Centre for the Arts

येंद्राग्नो द्वेपस्य। सुब्रह्मस्वराणासौरी सूर्यागच्छ हरिव आगच्छेति। अत्र सर्वे ग्रहाः सौर्याः। तद्ग्रहणमं
त्राश्च विभ्राड्बृहदित्याद्याः सप्तदश सौर्याः। प्राकृतमंत्राणां स्थाने भवंति। अन्यत्र सर्वत्र देवतापद
स्थाने सूर्यपदं प्रदं प्रयोज्यं। प्राकृआ दानं त्रेगभीर मिमध्वरं कृधि सूर्यायु स्तुष्टुतमभिनितिसो
म मान मंत्रेषु सूर्याय त्वादित्यव ते सूर्याय त्वाभिमातिघ्न इति वाचने। नत्व दन्य सूर्या स्तिमद्विता
सूर्यं ब्रवीमिति। सोमाप्यायने। प्यायतां सूर्याय एकधन विदे। आतुभ्यं सूर्यः प्यायतामात्वं सू
र्या यप्यायस्वेति स्वाहा त्वा सुभव सूर्याय इति प्रकृतिवत्। सूर्येभ्यस्त्वा मरीचियेभ्य इति च। ऐं
द्रवायवस्य ग्रहणे विभ्राड्बृहत्पि• राकृति सूर्याय त्वा• अयग्रहस्य पुनरग्रहणे। उदुत्यं जा• सूर्या
सूर्याय भ्यां त्वा। एष ते• सजोषो भ्यां त्वा। मैत्रावरुणस्य। येतापा वेक• पशूपति• उप• सूर्याभ्यां त्वा
श्रयेरगे तां धेनुं सूर्यो पूर्वं नड् इति। एषते योनिः सूर्याभ्यां त्वा। शुक्रामंथिनोः प्रकृतिवत्। आग्र
यणस्य चित्रं देवानां• षष्ठ। उपयामगृहीतो स्याग्रयणो सि• पवते। विश्वेभ्यस्त्वा सूर्येभ्यः। १४

एष• विश्वेभ्यस्त्वा सूर्येभ्यः। उक्थ्यग्रहणे उपया• सूर्याय त्वा बृहद्वते व• मि। यमे सूर्य इह त्य
इति। ध्रुवस्य• आनइडाभि• नीषा। उपया• सि ध्रु वोसीति। आसादने। एष ते योनिः सूर्याय
त्वा। साश्विनग्रहे देवाव ध्वर्यू• जाथ। उप• सि सूर्याभ्यां त्वा एष ते योनिः सूर्याय त्वा। आश्वि
नग्रहे देवाव ध्वर्यू•। जाथे। उप• सि सूर्याभ्यां त्वा। एष ते योनि र्माध्वीभ्यां त्वा। द्विदेवत्येषु क्र
वत्सौर्यमी तस्त्वेति। द्विदेवत्यप्रचारे। सूर्याय सूर्याभ्यां इति शेषासेचने सूर्येभ्यस्त्वेति। मैत्राव
रुणाश्विनयोः प्रचारे सूर्याभ्या मिति प्रैषो। प्रास्थितप्रैषे मधुश्च्युतः सूर्याय सोमानिति। प्र
शास्तृचमस हामे दंई सूर्याभ्यामित्य च्छावाकचमसे च। पोतृचमसे सूर्येभ्य इति• अन्येषु सू
र्यायेति तृतीये सवनेप्येवं। माध्यंदिने च सूर्यायेति सर्वचमसेषु। ऋतुग्रहेष्वपि व च नाना
मवि रिणा मस्त्यागेषु। ऐंद्राग्नग्रहणे। यदद्य कच्च• ते वशे। उप• सि सूर्याभ्यां त्वा। एष• सूर्या
भ्यां त्वा। वैश्वदेवग्रहणे। तरणि विश्वदर्श• चनं। उप• विश्वेभ्यस्त्वा सूर्येभ्यः एष। निर्विन्ने

Indira Gandhi National
Centre for the Arts

भ्यस्त्वा सूर्येभ्यः। उच्छ्रेषु सूर्येभ्यस्त्वा देवाव्य मिति देवेभ्यस्त्वेति मंत्रपदे। पदांतरेतु सूर्याभ्यां त्वा देवा
व्यमिति प्रथमात्ययोः सूर्याय त्वेति। मध्यमे। तथैव त्यागा अपि। माध्यंदिनेभिषवे पूर्ववत्। शुक्रामंथि
नोर्ग्रहणं प्रकृतिवत्। आग्रयणे चित्रं देवानामिति प्रातःसवनवत्। मरुत्वतीयस्य ग्रहणे। तत्सूर्यस्य
दे० मस्मे उप० सि सूर्याय त्वा मरुत्वते सादनं वे वं उ ग्रहणे। उप० सि सूर्याय त्वा बृहद्वते सूर्ये बृहद्
य इति। प्रस्थित याज्ये मंथी वतः। सूर्याय सोमानिति। मरुत्वतीयानुवाचनादौ सूर्याय मरुत्वतेनु
ब्रूहि। सूर्याय मरुत्वते प्रेष्यति। महामरुत्वतीयेग्रहणे। तन्मित्रस्य चरु० भरंति उपयामगृहीतो
सि सूर्याय त्वा मरुत्वते। सादनेप्येवं। कं ठ मरुत्वतीये। उपया० सूर्याणां त्वौजस इति। माहेंद्रे। ब
राम हांत्रा सि० आसि। उप० सि महा सूर्याय त्वा। तथैव सादनं। उच्छ्रेषु सूर्याय त्वा देवाव्यमिति। आ
दित्यग्रहे। ब सूर्य अव० रदाभ्यं सूर्येभ्यस्त्वा॥ अपगृह्य। आयंतइव दीधिम सूर्येभ्यस्त्वा। अ यणे
अधारेयाउदितो० द्यौ। सूर्येभ्यस्त्वा नि अणे। विवस्वन्सूर्येषत इति। सूर्येभ्योनु ब्रूहि सूर्येभ्यः प्रे २५

सूर्यपत्नीवन्निति ४

ष्य। तृतीयसवनेपि चित्रं देवानामित्याग्रयणग्रहणं प्रातःसवनवत्। उच्छ्रं च। नीत्रोग्र आशीर्वतः सू
र्याय सोमान् प्रस्थितानिति प्रेषः। सावित्रग्रहणे। आ कृष्णेन रजसा० पश्यन्। देवाय त्वा सूर्याय।
देवाय सूर्यायानु ब्रूहि। देवाय सूर्याय प्रेष्य। महावैश्वदेवग्रहणे। विश्वेभ्यस्त्वा सूर्येभ्य इति। पात्नीव
त होमे इदं सूर्याय पत्नीवते। आग्निमारुते इदं सूर्येभ्य इति। उच्छ्रिव ग्रहणेषु सूर्याभ्यां त्वा देवाव्य
मिति सर्वेषु। त्यागाश्च। सूर्यो मिहा रियोजनो हरिभ्यां त्वा सूर्योर्द्धानास्थ सह सोमाः सूर्यायेति द
क्षिणादि सर्वं प्रथमसुत्याहवत्॥ ॥इति सूर्यस्तुत्॥ ॥ अस्य चैकाहस्य स्वतंत्रप्रयोगे सोमक्र
यणाभिमंत्रणेषु बाध्वन स्यानु सूर्याया ध्यं त्वापेति अच्छेहि सूर्याय सोममिति चोहः। उपर
उपरिलेखने। गृहती सूर्याय वा चं वदेति विशेषः। ।ततो वैशारवकस्तत्तृतीयायां वैश्वदे
वस्तु दुच्छू श्चतुर्थमहः। आग्नेयैंद्राग्नौ द्वौ सवनीयपशू। अत्र वैश्वदेवी सुब्रह्मण्या सुब्रह्म
ण्यों ३ विश्वे देवा आगच्छतेति। अत्र ग्रहाः सर्वे वैश्वदेवा भवंति। तद्ग्रहणमंत्राश्च प्रचारज

Indira Gandhi National Centre for the Arts

इत्याद्याः सप्तदशवैश्वदेवा नेत्राकृताः। अन्येषु मंत्रेषु देवतापदस्थाने विश्वदेवपदप्रयोगः।
तत्रग्रावादानेगभीरमिमध्वरं कृतिविश्वेभ्यो देवेभ्यः ग्रहणं देयं यकच्च॰ तेवशे। उप॰ सि सूर्या
भ्यां त्वैषते सूर्याभ्यां त्वा। वैश्वदेवग्रहणे। तरणिर्विश्वदर्श॰ वनं। उप॰ विश्वेभ्यस्त्वा सूर्येभ्यः। उच्छे
षुसूर्येभ्यस्त्वादेवाव्यमितिप्रथमोत्पयोः सूर्यायत्वेतिमध्यमे। तथैवत्यागाश्चपि। माध्यंदिनेभि
षवे पूर्ववत्। शुक्रामंथिनोग्रहणं प्रकृतिवत्। आग्रयणे चित्रं देवानामिति प्रातःसवनवत्। म
रुत्वतीयस्य ग्रहणे। तत्सूर्यस्य दे॰ मस्मे। उपयामगृहीतोसि सूर्याय त्वा मरुत्वते। सादनेप्ये
वं। कुंठमरुत्वतीये। उपया॰। सूर्याशां त्वोजसइति। माहेंद्रे। वरामहां असि॰। उपसि महासूर्या
त्वा तथैव सादनं। उच्छेषुसूर्याय त्वा देवाव्यमिति। आदित्यग्रहे। वट्सूर्यश्रव॰ इदाभ्यं सूर्येभ्य
स्त्वा। अपगृह्य। आयंतइव॰ दीधिम सूर्येभ्यस्त्वा। अयणे। आद्यादेवाउदिता॰ द्यौः। सूर्येभ्य १६
स्त्वामिश्रणे। विवस्वन्सूर्यैषतइति। सूर्येभ्योनुब्रूहि। सूर्येभ्यः प्रेष्य। तृतीयसवनेपि चित्रं

देवानामिति आग्रयणग्रहणं आतेसुषूतममिति। सोममामो विश्वेभ्यो देवेभ्यो वसुमद्ग्रो मिमे।
विश्वेभ्यो देवेभ्यो आदित्यवद्ग्रो मिमे। विश्वेभ्यो देवेभ्यो भिमातिहभ्यो मिमे। वाचने। नयुष्मद
भ्यो विश्वेदेवाः अस्तिमर्डिताविश्वेदेवावृवामिवोवचइति। सोमाप्यायने। अंशुरंशुष्टे दे
वसोमाप्यायतां विश्वेभ्यो देवेभ्य एकधनाविद्भ्यः। आतुभ्यं विश्वेदेवाः प्यापंतामात्वं विश्वेभ्यो दे
वेभ्यः प्यायस्वेति। होमे स्त्वाहात्वा सुभव विश्वेभ्यो देवेभ्यः। विश्वेभ्यो देवेभ्यस्त्वा मरीचिपेभ्यः। ऐं
द्रवायवग्रहणे। अनाद्य नेहं॰ नियुत्वान्विश्वेभ्यस्त्वा देवेभ्यः। अपगृह्य पुनर्ग्रहणे। इंद्रवायू इह॰
सु ६ तं गरी॰ उप॰ सि विश्वेभ्यस्त्वा देवेभ्यः सादने। एष॰ विश्वेभ्यस्त्वा देवेभ्यः। मैत्रावरुणग्रहणे। व
रुणाः प्राविताभु॰ धसः। उप॰ विश्वेभ्यस्त्वा देवेभ्यः। अयणे। तां धेनुं विश्वेदेवाय पंनो विश्वाहे
ति सादनं सर्वत्र सदशमेव। शुक्रामंथिग्रहणे प्रकृतिवदाग्रयणे च। उक्थ्यग्रहणे। उप॰
सि विश्वेभ्यो देवेभ्यो बृहज्ज्योवयस्वद्भ्यः उक्थ्यं गृह्णामि। यद्दो विश्वेदेवा बृहद्वय इति। ध्रुव

ग्रहणोऽग्रानइन्द्राभिः सादने विश्वेभ्यस्त्वा देवेभ्य इति। आश्विनग्रहणो। अध्वर्यु इन्द्रेषा। आश्विना
उपयाम॰ विश्वेभ्यस्त्वा देवेभ्यः सादनेप्येवं। द्विदेवत्या वहरणोवकाशो वाचने ऋवन्वे श्वदेवसीदस्त्व
ति। द्विदेवत्ययागेषु। विश्वेभ्यो देवेभ्योनु ब्रूहि। विश्वेभ्यो देवेभ्यः प्रेष्येत्येवं सर्वत्र। विश्वेभ्यस्त्वा
देवेभ्य इति शेषा सके। प्रस्थितयागे मधुश्चुतो विश्वेभ्यो देवेभ्यः सोमानिति प्रेषः। इदं विश्वेभ्यो दे
वेभ्य इति सर्वत्र त्यागः। ऐन्द्राग्नग्रहे विश्वेभिः सोम्यमिति। वैश्वदेवग्रहे तु मास इति प्रकृतिवत्।
उच्छेषु विश्वेभ्यस्त्वा देवाव्यमिति सर्वेषु। माध्यंदिने मरुत्वतीये ग्रहणोऽग्र इन्द्रवरुण॰ जु
र्षत। उप॰ सि विश्वेभ्यस्त्वा देवेभ्यो मरुद्भ्य इति सादनेप्येवं। उच्छे प्रातःसवनवत्। मरुत्वतीया
नुवाचने विश्वेभ्यो देवेभ्यो मरुद्भ्यो नु ब्रूहीति विश्वेभ्यो देवेभ्यो मरुत्वद्भ्यः प्रेष्येति। महामरुत्वती
यग्रहणे। इन्द्राग्नी मित्रावरुण॰ मृतये। उपयाम॰ सि विश्वेभ्यस्त्वा देवेभ्यो मरुद्भ्य इति सादने
चैवं। विश्वेषां त्वा देवानामोज स इति कुठमरुत्वतीयग्रहणं। माहेन्द्रग्रहणे। अस्मे रुद्रा॰ देवा १९

त्वर

उप॰ सि विश्वेभ्यस्त्वा महादेवेभ्यः। सादनमप्येवं। उच्छेषु विश्वेभ्यस्त्वा देवेभ्यो दे॰ वाव्यमित्येवं सर्वे
षु। आदित्यग्रहणे। अर्वाचो अद्या॰ यजत्राः विश्वेभ्यस्त्वा देवेभ्यः। अयग्रहस्य पुनर्ग्रहणे। विश्वे अद्य
मरुतो॰ अस्मे विश्वेभ्यस्त्वा देवेभ्यः अयणे। विश्वे देवाः शृणुतेमं॰ मादयध्वं विश्वेभ्यस्त्वा देवेभ्यः
नि अयणे विवस्वतो विश्वे देवा एष वः सोमपीथस्तस्मिन्मध्वं इति। विश्वेभ्यो देवेभ्य इति प्रेषो। तृ
तीये सवने प्रकृतिवदाग्रयणग्रहणं। उच्छस्य प्रातःसवनवत्। आशीर्वतो विश्वेभ्यो देवेभ्यः
सोमानास्थितानिति प्रेषः। सावित्रग्रहणे देवेभ्यो हि प्रैष्यः। उप॰ सि विश्वेभ्यस्त्वा देवेभ्यः। विश्वे
भ्यो देवेभ्यो नु ब्रूहि विश्वेभ्यो देवेभ्यः प्रेष्यति प्रेषो। महावैश्वदेवे प्रकृतिवत्॥ पात्नीवतहोवनहो
मे विश्वे देवाः पत्नीवंतः सजुषो देवेन त्वष्ट्रा सोमं पिब स्वाहेति। इदं विश्वेभ्यो देवेभ्यः पत्नीव
द्भ्यः। इदं विश्वेभ्यो देवेभ्य इत्याग्नीमारुते त्यागः। उच्छवि ग्रहेषु विश्वेभ्यस्त्वा देवेभ्यो देवाव्यमि
ति त्रिष्वपि ग्रहणामंत्रः। त्यागश्च। हारियोजने। उप॰ सि विश्वे देवास्थ हारियोजना हरिभ्यां त्वा।

Indira Gandhi National
Centre for the Arts

हर्योर्द्दीनास्खुसहसोमा विश्वेभ्यो देवेभ्य इति। ।इति वैश्वदेवस्तुत। ।अस्मिन्स्व तंत्रे एकाहे सोमक्र
यणपभिमंत्रणे पूषाध्वनस्पा तु विश्वेभ्यो देवेभ्यो ध्यक्षेभ्यः। अच्छो हि विश्वेभ्यो देवेभ्यः। सोमं रुद्र इति।
उपरवपरिलेखने। यूहीं विश्वेभ्यो देवेभ्यो बाचं वदेति। ।प्रातर्वैशारवं कुलचतुर्थ्यां महाव्रतं तम
ग्निष्टोमसंस्थं पंचममहर्भवति। तत्राग्नेयः सवनीयः। आजापत्यउपालंभ्यः। विन इंद्र इत्यतिग्रा
ह्यवज्रहरणं। बाणेन प्रातर्भं तु नाएष्टोपकरणादि सर्वं महाव्रतधर्माः॥ ॥प्रातर्वाजपेयः ष
ष्ठमहर्भवति। तत्र सर्वं २ ग्रहपश्वादिकम सर्वं ग्रहपशुतिरिक्त स्तोत्राणां वाजपेयवत्। सोमक्र
यकालेसु रायाद्रव्याणां वीक्रयणादि तिष्पादनां तं च। व्रतस्थाने आश्वमेधिकमध्यमपक्षे
सर्वं तद्धर्मा रिशनादाना श्वालंभनादयो भवंति वाजपेयस्य। नेपो रूपमेधिकमध्यमपक्षे
पुरुषालंभनादिकं सर्वं तदीयं भवति॥ ॥ततः प्रातरप्तोर्यामः सप्तममहर्भवति। अ- २८
त्रातिरात्रिकाश्चत्वारः स्तोमायनपशवः। आग्नेयं द्वाग्नैंद्र सारस्वता। अत्र प्रातः सव

तु २

नेऽप्यातिरात्रिकाणां चर्णां पश्चूनां वपाहोमांते सर्वहोमो भवति। तत्र सर्वं वसुनातं प्रा
णिमात्रम प्रमाणिमात्रं च। प्रतिषिद्ध होमार्थ्य प्रतिकल्पयंति। नत्र जुहोति धर्मेण सर्वे तू
र्ण्यंपदार्थाः प्राणिजा मध्ये येषां प्राणिनां वया न भवति तेषां त्वचउत्कृत्योत्कृत्य जुहो
तिनावदाना नि च यांच तां वपा एव जुहोति। न हृदयं वदानानि। तेन पश्चून मारयित्वैवांगुष्ठ
पर्वमात्रत्व गवपाग्रहणं कर्त्तव्यं। ओषधिवनतानां संभ्रष्टा। औषधयो ब्रीहियवाद्याः। वनस्प
तयश्चाश्वत्थ मवरोदुंबराद्याः संबृश्चस्फूर्णाः। तं औषधीवनस्पतीनां संवृश्च आहवनीये
प्रक्षिपंति। कीडशीनामोषधीवनस्पतीनां। शुष्काणामार्द्राणां च। सर्वप्रकारमन्नं ब्रीहि
यवगोधूम मुद्गादिकं च जुहोति। सर्वासां स्थावरजंगमानामेकैकां व्यक्तिं जुहोति। सर्वा
णां चाप्लोनामवदानमात्रे जुहोति न सर्वा व्यक्तिरशक्यत्वात्। तत्र पात्रासादनं। अर्पीनि
होत्रहवणीधान्यसंख्याकाः पात्र्यः। प्रतिषिद्ध वर्जितयज्ञियसर्वप्राणिजातीयमेकैकां॥

Indira Gandhi National
Centre for the Arts

ओषधिवनस्पतिचूर्णैः। प्रतिषिद्धवर्जितानि सर्वधान्यानि च। ओषधिचूर्णोस्पतिचूर्णस्य धान्या
नां च प्रतिव्यक्तिकैकं चतुर्मुष्टिग्रहणं। प्रोक्षणादितरामात्रीणां संमार्गः। वपावतां पशूनां केव
लानां वपानां ग्रहणं उदरमध्यात् अवपाकानां त्वगुत्कर्तनं। ततो वपानां त्वचां संवृश्चस्य धान्या
च ४ नां प्राणदानं विघामासादनं आलंभः। जुहोतिवदाज्यभागौ। नेत्यपरे। प्रधानहोमेउपस्ती
र्णवपानामवदानं त्वचां च ओषधिवनस्पतीनां संवृश्च सर्वान्नानां च चैकत्रैवावदानं प्रत्य
पस्तरणं। तदेवाग्निस्तदादित्य इत्यध्याये महोमः। इदमात्मने इति त्यागः। कुतएतत्। तदेव
सर्वमेधोध्याय आत्मदैवतः समहनि सर्वहोमे विनियुक्त इति। कात्यायनोक्तेः। संप्रदायोक्त
प्रकारस्तु निर्मूल इव दृश्यते। ततः सर्पणादिकं विदोषे छिवनस्पतीनां संवृश्चस्य सर्वहोमा
त्पूर्वमाहवनीये प्रतिकरणमेव कुर्वंति। न होमं। होमसाधनभूतेषु वपाभागन्नादिषु प्र
कीर्णं त्यपरे। तद्युक्तं आतिरात्रिकपशूनां तृतीयसवनेपि आतिरात्रिकपशूनां हुतेषु १९

स४

वनस्पतियागात् प्राक् पात्रासादनादि प्रातःसवनवदेव पुनः सर्वहोमं कुर्यात्। अत्र यज्ञायज्ञीयतो दू
रमित्यनेनाध्यायेन सर्वहोमः कार्य इति हरिस्वामिनः। ततो वनस्पतियागादि॥ ॥ अत्र कठसू
त्रे। यदह रत्नो यीमा तदहः सर्वाश्चौषधीः सर्वांश्च वनस्पतीः संवृश्च आहवनीये तदेवाग्निरिति
प्रत्यृचं प्राक् स्विष्टिनिरम् ... यजुषा जुहोतीति। यज्ञायज्ञियांतगस्थ्यानि। ततः षोडशि
ततस्त्र्योरात्रिपर्यायप्रोक्ताः। ततआश्विनशास्त्रक चमसयागाः। ततस्तिरोह्नीयेभ्य ऊर्ध्वं च
तुर्थः पर्यायो रात्रिपर्यायवत्। तत्रास्थिराव त्र यस्मिंश्छाबस्न नवमानुष्टुप्संस्थे। तत्रापद्दोह
वाग्नेयैंद्राग्नौ सवनीयौ। ततो विश्वजिदतिरात्रो दशाममहः। तत्र चत्वारोतिरात्र पशव आग्ने
यैंद्राग्नैंद्रसारस्वताः सवनीयपशवः। अत्र च बहिष्पवमानं बहिर्भवति। अग्निष्टुति च
छंदोगवशात्। अहीन बहिष्पवमाने सदसि स्तुवीरन् प्रथमादह्नोन्यत्रेति छंदोगसूत्रं
आश्वमेधिकवर्ज शेषेषु सदसि। तिस्रोनुबंध्याः त्रैधातवहदवसानीया। ततआग्निर्बा

Indira Gandhi National
Centre for the Arts

१०.५०

यपस्य। तदंते सायमाहुतिः आदीप्यप्रवेशनं चेति। कर्कसंप्रदायमते पुरुषाश्च गोव्यजाः पं
च पंच पशवः प्रत्येकं सोमायन देवताभ्य आलभ्यंते। वपाप्रचारकाले च आलब्धपशूनां मध्ये
ये च यावंतो गोव्यजाः तेषां वपाहोमः कार्यः ये च वपाका पुरुषाश्वाः तेषां वपास्थाने त्वचलत्वो हु
स्य जुहोति। प्रैषश्चैवं। अग्नये पुरुषस्याश्वस्योस्रस्य मेषस्य छागस्य त्वग्वपाभ्यो मेदसोनु
ब्रूहीत्येवं प्रतिदेवमुच्चारणीयं। संप्रैषस्य वेदिमध्ये प्रकरणं। सर्वान्नेनैव केवलेन सर्व
होमोन्जुहोति। तत्रापि घृतस्य सोमायन देवताश्चत्वारि चतुर्गृहीतानि गृहीत्वा अ
ग्नये स्वाहा इंद्राग्निभ्यां स्वाहा इंद्राय स्वाहा सरस्वत्यै स्वाहेत्येवं उस्कवाले होमः। एतत्सूय
ध्यानघटते तत्सर्वं भाष्ये प्रपंचितं॥ ७॥ ॥सर्वमेधः समाप्तः॥ ॥७॥ ॥७॥ २०

Indira Gandhi National Centre for the Arts